# shrIvidyAkavacham

# શ્રીવિદ્યાકવચમ્ અથવા શ્રીષોડશીવિદ્યાકવચમ્

## Document Information

Text title : shrIvidyAkavacham

File name : shriividyaakavach.itx

Category : kavacha, devii, dashamahAvidyA, devI

Location : doc_devii

Author : Traditional

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar, lalitha parameswari parameswari.lalitha at gmail.com

Description-comments : siddhayAmala

Latest update : March 02, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીવિદ્યાકવચમ્ અથવા શ્રીષોડશીવિદ્યાકવચમ્

શ્રીગણેશાય નમઃ ।
દેવ્યુવાચ ।
દેવદેવ મહાદેવ ભક્તાનાં પ્રીતિવર્ધનમ્ ।
સૂચિતં યન્મહાદેવ્યાઃ કવચં કથયસ્વ મે ॥ ૧॥

મહાદેવ ઉવાચ ।
શ્રુણુ દેવિ પ્રવક્ષ્યામિ કવચં દેવદુર્લભમ્ ।
ન પ્રકાશ્યં પરં ગુહ્યં સાધકાભીષ્ટસિદ્ધિદમ્ ॥ ૨॥

કવચસ્ય ઋષિર્દેવિ દક્ષિણામૂર્તિરવ્યયઃ ।
છન્દઃ પઙ્ક્તિઃ સમુદ્દિષ્ટં દેવી ત્રિપુરસુન્દરી ॥ ૩॥

ધર્માર્થકામમોક્ષાણાં વિનિયોગસ્તુ સાધને ।
વાગ્ભવઃ કામરાજશ્ચ શક્તિર્બીજં સુરેશ્વરિ ॥ ૪॥

ઐં વાગ્ભવઃ પાતુ શીર્ષે માં ક્લીં કામરાજસ્તથા હૃદિ ।
સૌઃ શક્તિબીજં સદા પાતુ નાભૌ ગુહ્યે ચ પાદયોઃ ॥ ૫॥

ઐં શ્રીં સૌઃ વદને પાતુ બાલા માં સર્વસિદ્ધયે ।
હ્સૌં હસકલહ્રીં હ્સૌઃ પાતુ ભૈરવી કણ્ઠદેશતઃ ॥ ૬॥

સુન્દરી નાભિદેશે ચ શીર્ષે કામકલા સદા ।
ભ્રૂનાસયોરન્તરાલે મહાત્રિપુરસુન્દરી ॥ ૭॥

લલાટે સુભગા પાતુ ભગા માં કણ્ઠદેશતઃ ।
ભગોદયા ચ હૃદયે ઉદરે ભગસર્પિણી ॥ ૮॥

ભગમાલા નાભિદેશે લિઙ્ગે પાતુ મનોભવા ।
ગુહ્યે પાતુ મહાદેવી રાજરાજેશ્વરી શિવા ॥ ૯॥

ચૈતન્યરૂપિણી પાતુ પાદયોર્જગદમ્બિકા ।

નારાયણી સર્વગાત્રે સર્વકાર્યે શુભઙ્કરી ॥ ૧૦॥

બ્રહ્માણી પાતુ માં પૂર્વે દક્ષિણે વૈષ્ણવી તથા ।
પશ્ચિમે પાતુ વારાહી ઉત્તરે તુ મહેશ્વરી ॥ ૧૧॥

આગ્નેયાં પાતુ કૌમારી મહાલક્ષ્મીસ્તુ નૈરૃતે ।
વાયવ્યાં પાતુ ચામુણ્ડા ઇન્દ્રાણી પાતુ ઈશકે ॥ ૧૨॥

જલે પાતુ મહામાયા પૃથિવ્યાં સર્વમઙ્ગલા ।
આકાશે પાતુ વરદા સર્વત્ર ભુવનેશ્વરી ॥ ૧૩॥

ઇદં તુ કવચં દેવ્યા દેવાનામપિ દુર્લભમ્ ।
પઠેત્પ્રાતઃ સમુત્થાય શુચિઃ પ્રયતમાનસઃ ॥ ૧૪॥

નાધયો વ્યાધયસ્તસ્ય ન ભયં ચ ક્વચિદ્ભવેત્ ।
ન ચ મારી ભયં તસ્ય પાતકાનાં ભયં તથા ॥ ૧૫॥

ન દારિદ્ર્યવશં ગચ્છેત્તિષ્ઠેન્મૃત્યુવશે ન ચ ।
ગચ્છેચ્છિવપુરં દેવિ સત્યં સત્યં વદામ્યહમ્ ॥ ૧૬॥

ઇદં કવચમજ્ઞાત્વા શ્રીવિદ્યાં યો જપેત્સદા ।
સ નાપ્નોતિ ફલં તસ્ય પ્રાપ્નુયાચ્છસ્ત્રઘાતનમ્ ॥ ૧૭॥

॥ ઇતિ શ્રીસિદ્ધયામલે શ્રીષોડશીવિદ્યાકવચં સમ્પૂર્ણમ્ ॥

Encoded and Proofread by Ravin Bhalekar ravibhalekar@hotmail.com
and lalitha parameswari parameswari.lalitha at gmail.com

*shrIvidyAkavacham*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*